शास्त्रि द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्ये षष्ठपत्रः पञ्चमः परिच्छेदः

**व्यक्तिविवेककारस्य महिमभट्टस्य मतेन रसादि व्यञ्जकस्य अनुमाने अन्तर्भावो हेत्वाभासस्य सम्यक् प्रकार प्रदर्शनम्।**

ननु व्यञ्जनां पृच्छे, अनुमाने रसादयोऽर्थाः, तथा च काव्यं रसादिमत् विभावादिमत्त्वात्। इत्यनुमानेनैव रसादि व्यङ्ग्यज्ञान तदर्थं व्यञ्जनावृत्तेः स्वीकरणम् अनर्थकमेवेति व्यक्तिविवेककारस्य मतम्। तेषां अयमभिप्रायः - विभावानुभाव व्यभिचारीभावैः लिङ्गैः स्थायिभावाः अनुमीयन्ते। मत एव सूत्रम्। विभावादीनां स्थायिभिः सह प्रतीतिः साधनमित्युक्तं। विभावादयो रत्यादिस्थायिभावानां कारणकार्य सहचारिणो भवन्ति। यथा - धूमवत्त्वादयो वह्नेः कारणानि, अनुमितेः कारणं धूमादयः। एते च विभावादयः स्थायिनं अनुमापयन्ति इति रत्यादेः लिङ्गानि। अनुमान प्रकारश्च - इयं रामविषयरतिमती, सीता कटाक्षवत्त्वात्, या नैवं सा नैवं, यथा मन्थरा इति।

ते चानुमीयमाना रत्यादयः पुनः पुनरनुशीलनात् अलौकिकचमत्कारतया रसत्वमापद्यन्ते। इत्थमेव यथा प्रतीतिः अनुमीयमान रत्यादि योगेन रसादि रूपेण प्रादुर्भवन्ति रसादेः कारणानि उच्यन्ते तथा विभावादि उच्यते महिमभट्टानामाशयः।

अत्रोच्यते - किं शब्दाभिनय समर्पित विभावादि प्रत्ययानुमित रामादि गतरत्यादिरेव रसत्वेनाभिमतः भवता। शब्दाभिनय समर्पित विभावादि प्रत्ययानुमितं रामादिगतं रत्यादि भावनया भावुकैः अनुभूयमानं रसो वा। आद्ये न विवादः किन्तु रामादिगतं रत्यादि तस्य लौकिकत्वात् रसत्वमेव नोपपद्यते। अतोऽस्माभिरपि रसो नानुमानगम्यः। द्वितीयेऽपि प्रतीता 'अयं' सामाजिकः शृङ्गार रसवान् रामादिगतानुरागवत्वात् इति व्याप्ति सामाजिकान्तरस्य अनुमानेन रसज्ञानं भवितुमर्हति इति चेत् न, व्याप्ति ग्रहाभावात्। अतः अनुमाने तु धूमवह्न्योः व्याप्तिः गृहीतैव भवति, न तथा यथा अनुरागत्वेन रसयोः व्याप्तिरस्ति। न हि अनुरागवत्वं सदा रसेन सह अविनाभावेन तिष्ठति। अतो हि अलौकिकानां हृदये रत्यादिभावसत्त्वेऽपि न रसः लौकिकोऽपि उदेति। अतो हेतुर्व्यभिचारी एव।

अपि च अनुमेयः स हृदये यो रसास्वादः क्रियते स न अनुमानविषयः किन्तु प्रत्यक्ष विषयः।

पञ्चमोक्तं तेनैव - 'यत्रैव विभावो विभावानुभाव सात्विक व्यभिचारिभिः श्रृङ्गारादि रसाविर्भावः' इति काम अभिधानं अभिनयो वा तत्र-तत्र श्रृङ्गारादि रसाविर्भावः इति पुनरुक्तैव व्याप्तिः प्रदर्शिता च।

अन्यं तु विभावादि तथा सामग्री व्यञ्जनावृत्तिः अतो व्यङ्ग्यार्थ अभिव्यक्तेः कारणं ज्ञेय तत्र (महिमभट्टस्य) अनुमितेः साधनमिति।

अथ सिद्धान्तवादी समाधत्ते - इदं कथनमपि अस्माकं व्यञ्जनावादिनां न विरुद्धम्। न हि एवं क्रिया प्रतीतिः अनुमानतमितिं रसादि इत्यनुमानगम्यो रसादिविभावकेऽपि ते आस्वादरूपत्वेन अभिव्यज्यमानः किन्तु एवं प्रकाशमान विभावादिभिः साक्षात्कारः एव प्रतीतिमत्त्वात्। तेनात्र सिद्धान्तमिति - अनुद्भावे - रसादेरनुमेयत्व साधनादर्शनात्, आश्वादरूपत्व रसादि गतत्वम् अनुरागस्य अनुमानेन साधनाद् हेतो रसाभासतेति सिद्धम्।

उपेन्द्र साँ
7/8/20
एसो० प्रो० साहित्य
डॉ० उ० सं० महाविद्यालय
पुरुलिया, प्रदेश

Aug 9, 2020

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पणः अष्टमः परिच्छेदः

के वर्णाः कस्य रसस्य प्रतिपादकाः ? इति सोदाहरणं प्रतिपादनम्।

माधुर्य गुण व्यञ्जका वर्णाः – ट ठ ड ढ वर्जिताः कादयो मावसानाः निजवर्गान्त्ययुक्ताः रेफणकारौ ह्रस्वान्तरितौ समासाभावो मध्यमः समासो वा, समासः = पदानां माधुर्यवती रचना, माधुर्यस्य व्यञ्जिका। उक्तं च साहित्य दर्पणे –

'मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा॥'

यथा – 'अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः।
जनयन्ति मुहुर्यूनामन्तः सन्तापसन्ततिम्॥'

अत्र प्रथमार्द्धे अनुनासिकैः ङकारैः सह सम्बद्धाक्षराः माधुर्य गुणं व्यञ्जयन्ति। वृत्तिरप्यल्पा।

ओजो गुण व्यञ्जका वर्णाः — वर्गाणां प्रथमैः वर्णैः क च ट त प इत्यैः सह तदन्तिमा वर्णाः ख छ ठ थ फ इत्याः, तथा वर्गाणां तृतीय वर्णैः ग ज ड द ब इत्यैः सह तदन्तिमा वर्णाः घ झ ढ ध भ इत्याः युक्ता ओजो गुणं व्यञ्जयन्ति। एवं रेफस्योपरि अधः उभयत्र वा प्रयोगः ट ठ ड ढैः सह शकारः षकारश्च ओजसः व्यञ्जकाः। दीर्घसमासः, औद्धत्यशालिनी संघटना च ओजसो व्यञ्जिका। उक्तञ्च साहित्य दर्पणे —

'वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्यधो द्वयोर्वा सरेफाष्टठडढैः सह॥
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।
तथा समासो बहुलो घटनौद्धत्यशालिनी॥'

यथा – 'चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥'

अत्र द्भु इति, ड इति ण्ड इति च धियुक्ता वर्णाः भ्रमित इत्यत्र सरेफो वर्णः शो शो इति तालव्य शकारौ, अन्ये च संयुक्ताः वर्णाः ओजो व्यञ्जकाः।

प्रसाद गुण व्यञ्जका वर्णाः — श्रुतिमात्रेणार्थबोधकाः शब्दाः प्रसादस्य व्यञ्जकाः अयं सर्वेषु रसेषु सर्वासु रचनासु च तिष्ठति। उक्तं च साहित्यदर्पणे —

'शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः।'

यथा – 'सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः।
बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि॥'

अत्र श्रुतिमात्रतः अर्थबोधकाः शब्दाः प्रसाद गुण व्यञ्जकाः इति

उपेन्द्र झा 9/8/20
असि० प्रो० साहित्य
रा० उ० सं० महावि०
[illegible]

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

साहित्यदर्पणः द्वितीयः परिच्छेदः

---

उपादान लक्षणाया लक्षण लक्षणातो वैलक्षण्यम् उदाहरणद्वारा स्फोरणम् ।

---

लक्षणा द्विविधा — एका उपादान लक्षणा
अपरा लक्षण लक्षणा चेति ।
को अनयोर्भेद इति चेत् ! शृणु —

यत्र मुख्यार्थ विशिष्ट तदितरार्थ प्रतिपादक शब्दः, तत्र उपादान लक्षणा । अतएव इयम् अजहत्स्वार्थेत्युच्यते । एवं स्वार्थ परित्याग पूर्वक अन्यार्थ प्रतिपादक शक्तित्वं लक्षण लक्षणात्वम् । अतएवायं जहत्स्वार्था इत्युच्यते ।

उपादान लक्षणायाः उदाहरणं यथा — 'कुन्ताः प्रविशन्ति', अत्र अचेतनानां कुन्तानां प्रवेशन क्रिया सामर्थ्यं नास्ति इति कुन्तक रूप मुख्यार्थ विशिष्ट कुन्तधारी पुरुष रूपस्य मुख्यार्थेतरार्थस्य प्रतिपादकत्वात् कुन्तधारी पुरुषाः प्रविशन्ति इति उपादान लक्षणायाऽर्थो बोध्यते ।

लक्षण लक्षणायां उदाहरणम् — 'गङ्गायां घोषः' ।

विपरीत लक्षणायास्च उदाहरणम् —

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम् ॥'

इत्यत्र, उपकृतादयः शब्दाः अपकारिणं प्रति अन्वयं अलभमानाः अपकारादिरूपे स्वे स्वे परिणता अयमेव अनयोः उपादान लक्षणा लक्षण लक्षणा भेदः । यद् उपादान लक्षणायां मुख्यार्थस्य आत्मनोऽपि उपादानम् । लक्षण लक्षणायां तु परस्यैवोपलक्षणं मुख्यार्थस्य त्यागश्चेति ।

—

उपेन्द्र झा
9/8/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरनेला, पूर्णिया